लोकप्रियसाहित्यग्रन्थमाला - २२

भारतवर्षम्

(हृन्मञ्जूषायां लघुः स्वप्नः कोऽपि)

उत्कलभाषया मूलरचनाकारः

डॉ. सीताकान्तमहापात्रः

संस्कृतानुवादकः

डॉ. भागीरथिनन्दः

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः)
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८
दूरभाषक्रमाङ्कः - २८५२०९७६
टेली-फेक्स् - २८५२४५३२
e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

ISBN : 978-93-86111-58-6

संस्करणम् : २०१०

मूल्यम् : ₹ 145/-

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-११०००९
e-mail : amarprintingpress@gmail.com

पुरोवाक्

'लोकप्रियसाहित्यग्रन्थमाला'न्यतमकुसुमरूपेण कृतिमिमां सहृदयानां करकमलेषु समर्पयत् परमं मोदमावहति राष्ट्रियसंस्कृतसंस्थानम्। भवन्ति किल सुकवेः काव्यकरणप्रक्रियाया अनन्ताः पन्थानः 'न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभागुण' इत्यानन्दवर्धनोक्तेः। स्वीये परिवेशे तत्र तत्र ताँस्तान् विषयान् तत्तद्ग्राहककरणविषयीकृत्य स्वीयाप्रतिमालौकिकानुहरणक्रियया स्वयमादावास्वाद्य सामाजिकास्वादनाय स्वतः प्रत्यवभासितैर्लोकोत्तराह्लाद-जनकज्ञानगोचरार्थप्रतिपादकैः पदैरनुकीर्तयति सुकविः। कविरेव प्रथमास्वादकः स्वकविताया इति विप्रतिपत्तिरुक्तावस्यां न प्रशस्या, मम्मटभट्टेनालङ्कारिक-शिरोमणिना काव्यप्रकाशे काव्यप्रयोजनप्रस्तावे प्रदर्शितस्य "सद्यः परि नर्वृत्तिरि"त्यन्यतमकाव्यप्रयोजनस्य "यथायोगं कवेः सहृदयस्य च करा. ेतीति सर्वथा तत्र यतनीयम्", इति वृत्तिभागस्य सोदाहरणपरिशीलन-कृद्भिस्तट्टीकाकारैः कवेः परमानन्दास्वादयितृत्वसम्मतत्वात्, क्रौञ्चवध-विगलितपरिमितप्रमातृभावस्य तदाकाराकारितचित्तवृत्तेर्वाल्मीकेः 'मा निषादे'ति प्रथमलौकिककविताऽऽकस्मिकप्रत्यवभासादाद्यकवित्वेन सकलसहृदय-स्वीकृतत्वाच्च। विधात्रपरपर्यायः कविर्न कालक्रमाक्रान्तः क्वचित्। परिवेशपर्यवलोकितविषयान् क्वचित्स्वालौकिकशेमुष्या सद्यः काव्यत्वेन रूपयति, क्वचिच्च सद्यो रूपयन्नपि ताँस्तान् संस्काररूपेण स्वान्तःकरणे सन्धार्य समुचिते काले तत्तत्समुद्बुद्धं रूपं दीर्घकाव्यरूपेण प्रकाशयति। अतः पुञ्जितसंस्कारजन्यस्मृतिसमवायं यथावसरं तदनुगुणकल्पनाकलितं विधाय वयति प्रकरणानुसारिभिर्यथार्थपदैर्दीर्घं काव्यं कविः। तथाभूतेष्वेष्वन्यतमः सुकविराधुनिकः सीताकान्तमहापात्रो यः किलाबाल्यात् स्वीयं भारतदेशं, भारतीयां संस्कृतिं, भारतीयां च पीडां दर्शं दर्शं मनस्तत्त्वविवलितदृशा, यथोचितपदावल्या स्वदेशस्यामृतमर्त्यतां सम्पाद्याकर्षति सहृदयमनः, अङ्कुरयति च तत्र देशात्मबोधबीजम्। तदिदं ब्रूते स्वयं सीताकान्तः कविः—

("नवसर्गेषु समुपस्थापयितुं तत्कथां ममेयं प्रवृत्तिः। स्मृतिलिपिरियं सुदीर्घसमयस्य, अगणितानामाशाहताशानाम्, स्वप्नस्वप्नभङ्गयोः, असीमक्रा. ेध- क्षोभ-शान्तमुहूर्तानाम्") इति। (प्राक्कथनम् अनूदितम्)

वास्तवविकल्परचनाभिनिविष्टस्य कवेरस्य परम्पराऽऽधुनिकतयोः, स्मृतिस्वप्नयोः ग्रामनगरयोश्च युगपद्दर्शनं तदनितरसाधारणताप्रमापकं नूनमेव। मानार्थमिहेतो दिङ्मात्रं यथा–

सर्वमेव विज्ञाय सम्यग् वयं
प्रस्तावितशान्तिसन्धौ कुर्मो हस्ताक्षरम्
शान्तिसन्धिः घातकस्य हतस्य च
असिमण्डलनिस्सृतरुधिरधारायाः, प्रणवध्वनेश्चः ;
अस्याः पृथिव्या अविस्मर्यानन्दस्य
स्वर्गलोकाप्सरसां च ;
रौरवनरकस्य, वैकुण्ठस्य च
हालाहलस्य, अमृतस्य च
अनाहारमृत्योः, गङ्गाकूले स्वेच्छामृत्योश्च
सामगानस्य, रे-रेकारस्य च॥

(कविता-मङ्गलाचरणम्)

वास्तवप्रेमसौन्दर्यसंवदेनादिसंवलितसाहित्यकारेष्वन्यतमसुदक्षकवेर ाधुनि- कस्य सीताकान्तमहापात्रस्य भारतवर्षाख्यकाव्यग्रन्थस्योत्कलभ ाषानिबद्धस्य पारम्परिकया सुरगिराऽनुवादो विविधभाषापरस्परसंवादाय राष्ट्रियसंस्कृत- संस्थानस्य वस्तुतः कोऽप्यभिनवः प्रक्रमः। संस्कृतसहृदयानां भाषान्तर- साहित्यप्रवृत्तयेऽथच भाषान्तरीयाणां संस्कृतललितपदशय्यादरवध ेनाय प्रकाशनमस्य देवनागर्या भाषाद्वयसंवलितग्रन्थस्य साहित्यसरणौ संस्थानस्य किमपि विशिष्टं योगदानं वक्ष्यति। महत्तरमिदं कार्यं मदन्तेवासिनाऽऽयुष्मता भागीरथिनन्देन प्रयत्नपूर्वकं संस्कृतेनानूद्य सम्पादितमित्यवसरेऽस्मिन् तदुत्तरोत्तराभ्युदयं हृदयेन कामये। समय एव स्वच्छमुद्रणेन पुस्तकरूपतां

प्रददानाय अमरप्रिण्टिंप्रेसमुख्याय हीरालालमहोदयाय, संस्थानप्रकाशन-विभागकर्मकर्तृभ्यश्चाशेषधन्यवादाः।

राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्

प्राक्कथनम्

पुस्तकमिदं सङ्गमस्थलं त्रयाणां स्रोतसाम्। तत्र देश: -यस्य ध्यानमग्नेऽसीमस्वप्ने विजडिता अगणिता: स्मृतय:, मम कतिपयकला-कारमित्राणामवदानम्, प्रकम्पितशब्दहस्तेन स्वप्नस्य तस्य रूपणे मम यथाशक्ति प्रवृत्तिश्च।

कालातीतायाः सुप्राचीनायाश्च सभ्यतायाः सैषाऽमरभूमिः सर्वदैव वर्तम. ाना। समयस्यायमारम्भाद् बहुपूर्वमेवास्या जन्मतिथि:। अक्लान्तपदै: सञ्चलन्ती समायातैषा सुदीर्घं पन्थानमतिक्रम्य भूतत्त्वात्, परातत्त्वात्, इतिहासाच्च न: साम्प्रतिकं कालं यावत्।

अस्या एव स्मृतौ गुम्फितान्यगणितान्युपाख्यानानि। आदिगन्तात् प्रसृतायां समतलभूमौ ''चरैवेति चरैवेति'' प्रगायतां मानवानां स्रोतांसि। पाषाणगुहासु, कलनादिनीनां च नदीनां तटेषु विगुञ्जितो मर्मस्पृक् स्वर:। सा स्मरति बोधि द्रुमं, रुधिररञ्जितखड्गसङ्घातेनासङ्ख्यमृत्यून्, गतच्छत्रगृहेषु क्षुत्क्षामोदराणां जीवनायावाहनम्, शान्तपर्वतोदरेषु ध्यानमग्नाँश्च ऋषीन्। साऽपि स्मरति सकलं स्नेहं, सर्वं वैरं, समस्तं क्रन्दनं, निखिलं स्मितम्, अखिलां शून्यतां, पुञ्जितां च परिपूर्णताम्।

अहं तत्प्रेमाबद्धो मम ज्ञानोदयात् परम्। तस्या: सा सुरभिता मृत्तिका, यस्यामवतीर्णास्तारका:। सैषा मृत्तिका, यस्या वक्षसि पवनेन समीरितं हरिद्वर्णं शस्यक्षेत्रम्, नभसो मेघेन नीरन्ध्रतया या च योजिता गगनेन सह। अहं जीवितस्तस्या एव स्वर्गे। मृतश्च तस्या एव नरके। सा मे प्रियतमा, अन्तरङ्ग: शत्रुरपि।

नवसर्गेषु समुपस्थापयितुं तत्कथां ममेयं प्रवृत्ति:। स्मृतिलिपिरियं सुदीर्घसमयस्य, अगणितानामाशाहताशानाम्, स्वप्न-स्वप्नभङ्गयो:, असीम क्रोध-क्षोभ-शान्तमुहूर्त्तानाम्।

मूलरचनाकार:

सीताकान्तमहापात्र:

(उत्कलभाषात: संस्कृतानुवाद:)

प्रास्ताविकम्

अथ संयोगेन श्रीजगन्नाथस्य स्नानपूर्णिमाऽहनि परिपूर्णताम्- गादस्य भारतवर्षाख्यस्य काव्यग्रन्थस्य सुरगिरानुवाद इति कर्मणेऽस्मै तस्यैव भगवतोऽभङ्गुरा काऽपि करुणा कारणीभूतेति ननु प्रत्येमि। 'भारतवर्षम्' इति मूलत उत्कलभाषया भारतीयज्ञानपीठपद्मभूषणादिप्रमुखनैकसम्मान-पुरस्कारादिसमलङ्कृतेन डॉ.सीताकान्तमहापात्रेण नवसर्गैर्विरचित आधुनिकः काव्यग्रन्थः। देशेऽस्माकं समकालिकदक्षकविष्वन्यतमः किल सीताकान्त-महापात्र इति नात्र संशयः। परम्पराऽऽधुनिकते, अतीतस्मृति-भाविस्वप्नौ चैकीकृत्य वास्तवविकल्पस्य सर्जनायामस्य निरन्तरमभिनिवेशः। क्लेश-कल्मषादीनां मध्ये मानवस्थितेर्गभीरतममानन्दमनुसन्धत्तेऽस्य कविता।

सहृदयानां पुरस्तात् प्रस्तुतोऽयं काव्यग्रन्थो भारतदेशमस्माकमेनमाध ारीकृत्य पुरापुरोऽवलोकनाभ्यां समाहृतं किमपि सांस्कृतिकं रूपं निरूपयति। मानवसभ्यताया इदं भारतभूमिरनादिरनन्ता च याऽसत्यपि काले बभूव भविष्यति च। भूतत्त्वपुरातत्त्वेतिहासादीनतिक्रम्य सेयं साम्प्रतिके कालेऽस्माभिः सह सङ्गता, या चास्मास्वप्यसत्सु स्थास्यति। संस्कृत्यपरपर्याया सैषा नानाभूततत्त्वैः पुष्कला निरन्तरं 'चरैवेति चरैवेति' आवाहयति। एषा संस्कृतिः सञ्जीविता महानन्द-महादुःखे, सामगान-रेरेकारौ, स्वच्छाप्राणत्यागाऽ- नाहारमृत्यू, मानससरोवर-लघुकुल्ये, पञ्चतारकाऽऽवासभग्नजीर्णकुटीरे, यम- नचिक. ेतारौ, समादर-लाञ्छने चोररीकृत्य। अतः सुतरामेतेष्वन्यतरदतिरिच्यान्य- मात्रेण ाापूर्णैषा। एतेषां समेषां समवायेन स्मृतौ वास्तविकस्य सामाजिकानन्दस्यैवोद्रेक इति महापात्रमहोदयस्य कविताया एव विशेषः।

महापात्रमहोदयस्य कवितास्वत्यन्तमौलिकप्रान्तीयाया अत्यन्त-नागरिकायाश्च भाषायाः प्रयोगो युगपद्दृश्यते। अतः भाषाद्वारेणैव काव्यभावव्याहारे उपर्युक्तपरस्परविलोमावधारणानां समन्वयो ध्वन्यते। क्वचिदपि समुत्कृष्टनागरप्रयोगः, क्वचिच्चातिप्रान्तीयपदसंयोग इति द्वयोरनयोः समन्विततार्थः कश्चन शान्तसरलो मानवसभ्यतापरक

आनन्दानुभवः। कवेरस्य परिमलपदपटलोदरे कोऽपि विस्तृताशयशिशुः शोभते। काव्येऽस्मिन् भाषायास्तत्र तत्र वर्गवैविध्यप्रतिपत्तिकारणात् संस्कृतानुवादकाल आपतितायामपि कठिनतायां मया कथमपि तत्तत्पदानां सार्थकसमन्वयेनाक्षतभावोपपत्तये प्रवृत्तेन तदनुरूपा यथाशक्ति च तदभिन्नाः शब्दा इह विन्यस्ताः।

पुस्तकेऽस्मिन् सम्पूर्णं काव्यमुत्कलभाषा-सुरभाषाभ्यां च प्रतिपूर्वपरपृष्ठं युगपत् समानमात्रया सन्निहितमस्ति। एतेन सहृदयाः पाठका न केवलं भाषाद्वयीविरचितमेकमेव काव्यमेकत्रास्वादयिष्यन्ति, अपि च एकस्यैव तस्य द्वयो रूपयोरुभयत्र काव्योपादानानामास्वादनविधौ तुल्यतामङ्गीकरिष्यन्ति चेत्तर्हि विजयो वस्तुतः संस्कृतस्य, साफल्यञ्च मे भाषान्तरसाहित्य-संस्कृतीकरणाभिनिवेशस्य।

इहानेकस्थलेषु काव्यानुगुणभाषासंस्कारोऽस्मन्माननीयगुरु- वरैराच ार्यराधावल्लभत्रिपाठिमहोदयैरुपदिष्टः। त एते च साम्प्रतिकाः राष्ट्रिय-संस्कृतसंस्थानकुलपतयः स्वाशिषा वात्सल्येन च प्रकाशनार्थमस्य सम्मतिं प्रदाय मामुपकृतवन्त इति प्रौढाधुनिककविसमीक्षकान् गुरुपादानेतानवसरेऽस्मिन् सविनयं प्रणमामि। किञ्च, मम विद्यार्थिजीवने निर्दोषाभिव्यक्तये मां सर्वदैव प्रबोधितवतां संस्थानकुलसचिवप्रवराणामाचार्यरामानुजदेवनाथगुरुवर्याणां कृते मे सादरं प्रणामाञ्जलयः। ग्रन्थस्यास्यानुवादे मां सदयं संयोजितवतीं विख्यातामौपन्यासिकां प्रतिभारायमहोदयां प्रत्यहं कृतज्ञः। महता श्रमेण कार्यमिदं स्वच्छसङ्गणकीयटङ्कणेन समापितवतेऽनुजाय डॉ. प्रभात-कुमारदासायाशेष धन्यवादाः। अन्ततः काव्यमिदं संस्कृतसामाजिकानां मोदायोपकल्प्यतामिति मनसा कामयमानो–

स्नानपूर्णिमा **भागीरथिनन्दः**

जून २०१० सहयोगी आचार्यः,

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

सूची

सूची



यतीनदाशः

प्रथमः सर्गः

प्रथम सर्ग

मङ्गलाचरण

माआ कहिथिले
एइ माटिर सबु किछि आम लोकङ्क पाइँ पवित्र;
प्रत्येक पाइन् पत्र; प्रति बालिप्रान्तर उपकूल
घञ्च अरण्यरे सबु कुहुड़ि
सबु अधित्यका, गुणुगुणु करुथिबा सबु पतङ्ग
आम लोकङ्क स्मृतिरे देवोपम॥


– कागजपत्ररे आमेरिका सरकारङ्कु
स्वइलाका हस्तान्तर बेले चिफ् सिएटल्ङ्क उक्ति
(उद्धृति : 'भाइ इगल्, भउणी आकाश')

प्रथमः सर्गः

मङ्गलाचरणम्

उपदिदेश माता
भूमेरस्या निखिलमेव पवित्रमस्मभ्यम् :
प्रत्येकं देवदारुपत्रम्, प्रत्येकं सिकताप्रान्तरोपकूलम्
घनारण्यस्य सकला कुञ्झटिका
सर्वाऽधित्यका, गुञ्जन्तः समस्ताः पतङ्गाश्च
देवोपमाः स्मृतौ किलास्मज्जनानाम्।

—कर्गजपत्रेषु अमेरिकासर्वकाराय
स्वराज्यहस्तान्तरीकरणकाले सियेटलमुख्यस्योक्तिः
(उद्धरणम् : ''भ्राता इगल, भगिनी आकाशम्'')



शिवनारायणसिंहः

॥ १ ॥

युगयुगान्तरर से इतिवृत्त।
शुभ्र आलुअर उच्चाटित मुद्रा वाट कढ़ाए
निरंध्र अंधाररु ज्योति वलयकु।
अवरुद्ध चेतनार गुहारु
फिटि फिटि जाउथिवा मनोहारि दिगंत आड़कु।।

ता'रि हात धरि आमे पादे पादे आगेइछु
चम पोड़ि जाउथिवा ततला मरुभूइँरु
पहिलि वसन्त पवनर
थरथर हातर स्पर्शकु।।

जे यात्रा सदा कालर
से यात्रा एमिति एक गहन अलौकिकताकु
जाहार सामान्यतम मुद्रा वि बुझि हुएनि
बेले बेले;

अथच सान्त्वना दिए, छाइपरि पाखरे छिड़ा हुए
प्रतिश्रुति थाए, मुद्रा सबु अर्थभाररे हिँ अवनत
फलन्ति गछङ्क परि
नइँथिवा वर्षुक बउद परि।।

8 ।। भारतवर्षम्

॥ १ ॥

युगयुगान्तरगतं तदितिवृत्तम्
शुभ्रालोकस्य दीप्तमुद्रा मार्गं दर्शयति
नीरन्ध्रान्धकाराज्ज्योतिर्वलयमभितः।
अवरुद्धचेतनागुहातः
शिथिलित–मनोहारिदिगन्तमभितः।।

तस्य करावलम्बेन वयं शनैःशनैरग्रे गताः
चर्मदाहक – तप्तमरुभूमितः
प्राथमिकवसन्तपवन–
पुलकितकरस्पर्शाय।।

या यात्रा सार्वकालिकी
सैवमेकां गहनामलौकिकतामभिसरति
यस्याः सामान्यतमापि मुद्रा नावगम्यते

अथ च सान्त्वयति क्वापि, छायेव निकटे तिष्ठति
प्रतिश्रृणोति च; मुद्रास्ता अर्थभारैरवनताः
फलिनः पादपा इव
आनम्रा वर्षणोद्यताः पयोदा इव।।

सबु बुझिगला परे आमे
प्रस्तावित शान्ति चुक्तिरे करु आमर सन्तक :
शान्तिचुक्ति घातक ओ मृतकर;
असिरु झरिपड़िवा रक्तधार, प्रणव-ध्वनिर;
ए पृथ्वीर अपासोरा आनन्द
ओ स्वर्गलोक अप्सरीङ्कर;
रौरव नर्क, वैकुण्ठर
हलाहल ओ अमृतर;
अनाहार मृत्यु आउ गङ्गाकूल स्वइच्छा मृत्युर;
सामगान एवं रेरेकार।।

बेले बेले दुशिजाए
आश्रम ओ निर्जन पर्णकुटी
गाँ गाँ वस्ति वस्ति, लोकभर्ति सहरठुँ
झाटिमाटि कान्थ आउ अखाघेरा घर
जेते विलास सदन पञ्चतारकार
सकले जेझा स्थानरे;
आउ केबे दुर्वार घूर्णिरे
से सकल हजिजान्ति
इतिहास दारुण दुःस्वप्न होइ राहुग्रस्त हुए

सर्वमेव विज्ञाय सम्यग् वयं
प्रस्तावितशान्तिसन्धौ कुर्मो हस्ताक्षरम्
शान्तिसन्धिः घातकस्य हतस्य च
असिमण्डलनिस्सृतरुधिरधारायाः, प्रणवध्वनेश्च;
अस्याः पृथिव्या अविस्मार्यानन्दस्य
स्वर्गलोकाप्सरसां च;
रौरवनरकस्य, वैकुण्ठस्य च
हालाहलस्य, अमृतस्य च
अनाहारमृत्योः गङ्गाकूले स्वेच्छामृत्योश्च
सामगानस्य, रे-रेकारस्य च।।

कदा कदा संदृश्यन्ते
आश्रमाः, निर्जन-पर्णकुटीराणि,
ग्रामाः, वसतयः, जनाकीर्णनगराणि,
शाखागुच्छमृन्निर्मितभित्तयः, गोणीवेष्टितगृहाणि,
पञ्चतारकाविलाससदनानि च।
सर्वाण्येतानि स्वस्वस्थानेषु;
कदापि च दुर्निवार्यघूर्ण्या
तान्येतानि विनश्यन्ति
इतिहासो दारुणो दुःस्वप्न इव राहुग्रस्तो भवति

जेमिति आमर सेइ आदि यात्रा
से अलौकिकता, से सकल शान्तिचुक्ति
सबु मिछ डाहा मिछ
ओह्लेइ जिबाकु हेब पुनरपि आलोकरु
घन तमिस्राकु। साम्नारे जे अन्धारर बाइश पाहाच।
क्षणुटिए से दुर्गति, से अन्धार। पुनरपि
लेउटाणि आरम्भकु, आरम्भरु आरम्भकु
जङ्गल ओ मेघङ्कर लुचकालि
नदीङ्क लहरी आउ सामगान युगलवन्दीकु।।

आगो माआ, हे भारतवर्ष
जननी गो सेतिकिरे मिलियाए
सबु शिशुङ्क खेलणा
समयकु उपकथा, वृद्धंकु सपन
चातककु वर्षा टोपा
सबु दुष्ट, सबु अज्ञ चढ़ेइङ्कु
आकाश ओ गीत
मिलियाए सबु विरहीङ्कु आपणार मित।।

यथाऽस्माकं साऽऽदिमा यात्रा
साऽलौकिकता, स च शान्तिसन्धिः
सर्वं मिथ्या पूर्णतो मिथ्या
अवतरणमेव वरं पुनरपि आलोकाद्
घनान्धकारे। पुरस्ताद् यत् अन्धकारशतसोपानानि।
क्षणाय सा दुर्गतिः, सोऽन्धकारः। पुनरपि
प्रत्यावर्तनमारम्भं प्रति, आरम्भस्यारम्भं प्रति
घनवनयोर्निमीलक्रीडां प्रति
नदीलहरी-सामगानयोर्युगलगानं च प्रति।।

हे मातः, हे भारतवर्ष,
हे जननि, एतावतैव लभ्यते
शिशुभ्यः क्रीडनकम्,
समयायोपकथा, वृद्धेभ्यः स्वप्नः,
चातकेभ्यो वृष्टिबिन्दुः,
दीनचञ्चलविहगेभ्यः
आकाशं, गीतं च,
लभ्यते च विरहिणे स्वीयप्रियमित्रम्।।

हात धराधरि होइ पुनरपि हुअन्ति बाहार
कादुअ, नक्षत्रमाला; शिकारी शिकार
संगीत ओ श्लोक पारायण करुथान्ति
सभिए रहन्तु निज थानरे ओ महा आनन्दरे
सभिङ्कर आपणा उद्देश्य अछि सृजनर ए पुण्य भूइँरे।।

तुमे मोर इहकाल, परकाल
हताशा, दीर्घश्वासर
संगीत ओ जोछनार
परावृत्त तमिस्रार महमह भूइँ
वर्षा भिजा, सौरदग्ध
मलय पवन आउ कोइलिर पञ्चमर उच्चाटित
यन्त्रणार नीरवित
शीतल हावारे सदा पुलकित
निर्जन महाशून्यरे सदा मुखरित।।

तुमे मोर अन्तरंग शत्रु
आउ विमुग्ध प्रेमिका जिए
निद्रित पथर बुके
बाजुथिवा संगीतकु शुणे
असुमारि मणिषङ्क हताशा ओ स्वप्न नेइ

करेण करमाबध्य पुनरपि बहिर्निस्सरतः
कर्दम-नक्षत्रमालिके; व्याध-वध्यौ पारायणं कुरुतः
सङ्गीत-श्लोकानाम्
निवसन्तु सर्वे स्वस्वस्थानेषु सानन्दम्
सर्वेषां स्वं स्वमुद्देश्यमस्ति सर्जनाया अस्यां पुण्यभूमौ।।

त्वं हि मम इहकाल-परकाल-
हताशा-दीर्घश्वास-
सङ्गीत-ज्योत्स्ना-
परावृतान्धकाराणां सुरभिता भूमिः
या वृष्टिसिक्ता, सौरदग्धा,
मलयपवन-कोकिलपञ्चमोद्दीप्ता
यन्त्रणया शान्ता
शीतलसमीरणेन सदा पुलकिता
निर्जनमहाशून्ये च सर्वदा मुखरिता।।

त्वं हि मम अन्तरङ्गशत्रुः
विमुग्धप्रेमिका।
या निद्रितपाषाणहृदि
गुञ्जितं सङ्गीतं श्रृणोति,
अगणितमानवानां हताशाभिः स्वप्नैश्च

इतिहास वुणे
अन्तहीन इतिहास वुणे।।

॥ २ ॥

आखि खोला अथच गाढ़ निदरे
शोइछि मुँ एतेदिन
निमज्जित ताहारि स्वप्नरे।
देश नुहँ काल नुहँ
समय बाहारे सिए कालातीत स्वप्नटिए।
स्वप्न याहा आमर सबु मायाकु
अधिक साकार करे, सान्द्र करे
आमकु ओ आमर भ्रान्तिकु आहुरि वास्तव करे
आमकु अजणा केउँ मोहन मन्त्ररे,
या फलरे
महमह माटिरे नक्षत्र झरे।।

कौणसि मानचित्ररे तालपत्र पोथि अवा
भुर्जपत्र ओ तम्बापटारे लिपिबद्ध करि हुएनि
तुम चित्र। घषि घषि से अदृश्य सीमारेखा
लिभेइ पारन्ति नाहिँ दुरन्त असुर।।

इतिहासं वयति
अन्तहीनमितिहासमेव।।

॥ २ ॥

उन्मीलितचक्षुरथ च गाढनिद्रः
सुप्तोऽहमेतावन्ति दिनानि
निमज्जितस्तदीयस्वप्ने।
न देशजो नापि कालजः
स तु कालातीतः स्वप्नः कश्चित्।
स तथाभूतो योऽस्माकं सकलां मायां
साकारतरीकरोति, सान्द्रीकरोति चास्मान्,
भ्रान्तिमपि नोऽधिकतरं वास्तवयति
केनाप्यविज्ञातमोहनमन्त्रेण,
येन
सुरभितभूमौ नक्षत्रं वर्षति।।

कस्मिन्नपि मानचित्रे तालपत्रपोथिकायां वा
भुर्जपत्रे ताम्रफलके वा न सङ्कलयितुं शक्यं
त्वच्चित्रम्। घर्षणेन पुनः पुनरपि तामदृश्यसीमारेखां
न निर्वापयितुं प्रभवन्ति दुरन्ता असुराः।।

से रूप वखाणिवाकु चेष्टा करि हारिगले
कोटि कोटि चित्रकार, स्थपति ओ कविकुल।
एमिति वि चिह्नाजणा रास्ता नाहिँ योउ वाटे
चालि चालि, चालि चालि पहुञ्चिव ता गुप्त मन्दिर।।

से स्वप्नकु जन्मजन्मान्तर धरि चाहिँ रहिछि मुँ
खोला आखि अपलक नयनरे
गभीर निदरे। अवशेषे मुँ होइछि
सेइ सपनर अविभाज्य अङ्गटिए। से देखिछि मो आरम्भ
शुणिछि मो कुआँ डाक
समय आसिले सिए वि देखिव मोर शेषदिन
येमिति आरम्भ शेष देखिछि सेमानङ्कर;
नचिकेता, आकवर, आलेक्ज़ाण्डर
आउ उद्दालक, याज्ञवल्क्य, शुक ओ सौनक मुनि
शोभायात्रा सम्राट् ओ मन्त्री एवं पारिषदङ्कर।।

॥ ३ ॥

अनेइले बेलेबेले प्रते हुए
सिए मोर आईमाआ
गेह्लाकरि आउँशि देउछि मोते केड़े सरागरे
बापाङ्कठुँ बेतमाड़ खाइ कान्दुथिवा पिलाटिकु

वर्णयितुं तद्रूपं सम्प्रवृत्ताः पराजिता
अगणिताश्चित्रकाराः, स्थपतयः, कवयश्च
एवमपि नास्ति मार्गः परिचितः येन
पद्भ्यामेव प्रवेष्टव्यं तद्गुप्तमन्दिरम्।।

स्वप्नं तं जन्मजन्मान्तरेभ्यः प्रतीक्ष्येऽह-
मुन्मीलितनिर्निमेषचक्षु-
र्गाढनिद्रायामपि। अन्ते, तावदहमेव
तस्य किल स्वप्नस्याङ्गमविभाज्यम्। तेन दृष्टो ममारम्भः
श्रुतं मम प्रथमं क्रन्दनम्,
काल एव स द्रक्ष्यति ममान्तिमदिनम्
यथा दृष्टावारम्भान्तौ तेषाम्
अकबर-नचिकेतृ-सिकन्दरो-
द्दालक-याज्ञवल्क्य-शुक-शौनकानां,
शोभायात्रासम्राण्मन्त्रिपारिषदानां च।।

॥ ३ ॥

अनुभवे कदा कदा प्रतीयते
सा मे मातामही
वात्सल्येन हस्तादरमतिप्रेम्णा वितरति
पितुर्वेत्रदण्डेन रुदति बालके,

प्रेमिक किशोरटिकु नूआ प्रेम कथा भावि
उत्तला जह्नरातिरे
भाङ्गि पडुथिवा बेले अजणा दुःखरे
प्रतिपदा जह्नपरि काणिचाए हस
लागिछि ता पाकुआ पाटिरे।।

आउ त केबे दुशिछि बोउ परि
भातथालि पाखरे जगि वसिछि माछि हुरुड़ेइ
काह्नार गोठ वाहुड़ा बेल जगि
बेल जगि स्कुलरु ओ अफिस्‌रु फेरन्ता बाटकु
नाना जाति अन्न ओ व्यञ्जन सबु रान्धिबाढ़ि
वास्नार महक येते थालिरे सजाड़ि।।

देश नुहँ, इतिहास भूगोलर वस्तु नुहँ
भूतत्त्वरु पुरातत्त्व। परस्त परस्त परम्परा नुहँ
बरफ चादर घोड़ा शृङ्ग नुहँ
गुम्फा नुहँ ध्यानमग्न ऋषि मुनिङ्कर
सुफिआना गाउथिवा, नमाजरे निमज्जित
पूत आत्मा नुहँ। बालि आउ मरीचिका
ढाङ्कि होइ शोइथिवा मरुभूमि नुहँ
से वि नुहँ महानदी गोदावरी सिन्धु ओ कावेरी।।

नवप्रेमकथाश्चिन्तयति प्रेमिककिशोरे
चन्द्रधौतनिशि
अज्ञातदु:खैस्त्रुटितेऽपि।
प्रतिपच्चन्द्ररेखेव स्मितच्छटा
सन्निहिता तन्निर्दशनमुखे।।

कदा पुन: प्रतीयते जननीव
उपविष्टाऽन्नपात्रनिकटेऽपसार्य मक्षिका:
कृष्णस्य गोष्ठात् प्रत्यागमनकालं प्रतिपालयन्ती
प्रतीक्षते वा विद्यालयात् कार्यालयाद्वा प्रत्यागमनम्
नानाविधान्नव्यञ्जनानि प्रस्तुवन्ती
सर्वामोदानन्नपात्रे एकत्रीकृत्य।।

नहि देशो वस्तु भूगोलेतिहासयो:,
न भूतत्त्वस्य पुरातत्त्वस्य वा। न च परम्परा कालक्रमागता
नापि हिमांशुकावृतं शृङ्गं
नहि गुहा ध्यानमग्नमुनीनां
न वा सूफीसङ्गीतोपासितो
नमाजनिमज्जितपूतात्मा।
वालुका-मरीचिकावृता न मरुभूमि:
सोऽपि नैव महानदी, गोदावरी, सिन्धु:, कावेरी वा।।

सिए गढ़ा ए सकल उपादाने
अथच आहुरि किछि अबुझा, अवर्णनीय
गूढ़ ओ गोपन वस्तु झलसुछि ता आत्मारे
याहाकु बुझिहुएना पूरापूरि, स्वप्न परि लागुथाए
देखिथिवा सुदीर्घ स्वप्नरे
से येमिति चिरकाल झुरुथिवा
महुरीर सुमधुर स्वर
सबु हस कान्द आउ आह्लाद-विषाद नेइ
सुलुसुलु नईकूल पवनरे
प्राणछुआँ वईँशी लहर
अद्भूत उर्वर माटि
फसलर कोरस्रे शिहरित वर्षा वउदर।।

❖❖

स निर्मितः सकलैरेभिरुपादानैः
तथापि बहुधाऽबोध्योऽवर्णनीयश्च
नैकं गूढं वस्तु सन्निहितं तदात्मनि
यन्नावगम्यं पूर्णतः, प्रतीयत आभास इव
अतिदीर्घे दृष्टपूर्वे स्वप्ने च
चिरविधुरमधुरीमधुरस्वर इव
स यथा आह्लादविषादहास्यमन्यूनासाद्य
नदीतटधीरसमीरणे
मर्मस्पृक् मुरलीनिःस्वनः
अद्‌भुतोर्वरभूमिजातशस्यसम्मिलित-
सङ्गीतपुलकितवृष्टिपातान्वितः॥

❖❖



हाकुशाहा

द्वितीयः सर्गः

द्वितीय सर्ग

यात्रा

जीवन यात्रा मझिरे बाटहुड़ि आमे
पहञ्चिलु अन्धारिआ जङ्गलरे

x x x

याहा हेउ आमे आउथरे
तारामानङ्कु देखिपारिले।

– दान्ते आलिघिएरि
इतालीय कवि

द्वितीयः सर्गः

यात्रा

जीवनयात्रामध्ये पन्थानं विस्मृत्य वयं
प्रविष्टा अन्धकाराच्छन्नं काननम्।

x x x

अस्तु, दिष्ट्या यद् वयं पुनरपि
अपश्याम तारकासन्ततिम्।

—दान्ते अलीघियरी
इतालीयकविः

॥ १ ॥

अन्तहीन एइ यात्रा
माटिरु नक्षत्र पुणि उजाणि माटिकु
सकल पवित्र एठि कार्गिल्‌रु कामाक्षा
ओ दशाश्‍वमेध घाटरु पुरी स्वर्गद्वार।
मुरुभूमि, उपत्यका, अधित्यका पाहाड़ डङ्गर
प्रत्येकटि झरापत्र, मौसुमीर द्रुत वउदरे
वापाङ्कर अजाङ्कर स्वर शुभे
पाइन्‌ वण कुहुड़ि, यज्ञकुण्ड घृताहुति
हिमालय बरफ झड़रे
नदनदी प्रवाहरे इतिहास कथा कहे
कथा कहे उषा ओ उषसी
सुमधुर वीणार झङ्कारे।।

समस्ते ये अन्तरङ्ग
सभिङ्क डाकरा शुणे अस्थि रन्ध्र
मांस ओ स्नायुरे।
मो रक्तरे चिह्निपारे
से रसर प्रवाहकु यिए वहे
गाआँमुण्ड अश्‍वत्थ काण्डरे

॥ १ ॥

अन्तहीनेयं यात्रा
भूमितो नक्षत्रपर्यन्तं, ततः पुनर्भूमिम्।
सकलं पवित्रमिह कारगिलतः कामाक्षां यावत्,
दशाश्वमेधघट्टात् पुरीस्थस्वर्गद्वारं यावत्।
मरुभूम्युपत्यकाऽ-धित्यका-पर्वत-वनजारभूमि-
पाण्डुपत्रादिषु, नभसि प्रत्यासन्नद्रुतजीमूतखण्डेषु च
पितृपितामहानां स्वरः श्रूयते।
देवदारुवनकुज्झटिकायां, यज्ञकुण्डघृताहूतौ,
हिमालयतुषारवात्यायां,
नदनदीप्रवाहे च प्रस्फुरतीतिहासः।
आलपत्युषा
सुमधुरवीणाझङ्कारवत्।।

सर्वे किलान्तरङ्गाः
समेषामावाहनं श्रूयतेऽस्थि-रन्ध्र-
मांस-स्नायुषु।
मम रुधिरे परिचिनोमि
तस्य रसस्य प्रवाहम्, यो वहति
ग्रामप्रान्ताश्वत्थकाण्डेषु,

चित्रोत्पला, गोदावरी, यमुना पाणिरे दुशियाए
पणजेजे याज्ञवल्क्य ऋषिङ्कर तेजोदीप्त आखि
दि दिन उपास परे यम उआसरे
नचिकेतार उदास मुँह दिशे
भारि निरिमाखि। गङ्गार गुणुगुणुरे
शुभियाए आईमाआ स्वर
केते युग, केते जाति, केते कथा, उपकथा
नई पापुलिरे शोहे दीर्घ इतिहास
सवु ये सन्निधि हुए रोग शोक
जरा मृत्यु आशा ओ विश्वास।।

॥ २ ॥

किए ये सेमाने अनेक दूररु आसुछन्ति
साम्नारे ताङ्कर भीषण टाङ्गर भूइँ
हाते धनुशर। सेकड़कु आम्ब तोटा
महुवण, शुखिला कूअ, रास्तारे अत्यन्त पुरुणा
पथररे सिन्दूर ओ माटि हातीघोड़ा
गछतले देवीङ्क माजणा।।

चित्रोत्पला-गोदावरी-यमुनादिजले दृश्यते
प्रपितामहस्य ऋषियाज्ञवल्क्यस्य तेजोदीप्तिं चक्षुः
दिवसोद्वयोपवासात् परं यमगृहे
नचिकेतुरदासीनं वदनम्
अत्यन्तं दयनीयम्। गङ्गाया गुञ्जने
श्रूयते पितामहीस्वरः
न जाने, कियन्ति युगानि, कियत्यो जातयः,
कियत्यः कथा उपकथाः
नदीकरतले शोभते च दीर्घ इतिहासः
निकटतरीभवन्ति च सर्वे
रोगशोकमृत्युजराऽऽशाविश्वासाः॥

॥ २ ॥

के ते बहुदूरादायान्ति
पुरस्तात्तेषां भीषणोद्घातिनी भूमिः
हस्तेषु धनूंषि सायकाश्च। परतस्तु सहकारकुञ्जं,
मधुलवनं, शुष्कः कूपः, मार्गे चात्यन्तप्राचीनं
पाषाणे सिन्दूरं, मृण्मया गजवाजिनः
वृक्षस्याधो देव्या उपासना॥

दिग्वलयरु जेमिति सेमाने आसुअछन्ति
हजुछन्ति दुशुछन्ति मरुर मरीचिकारे
अण्टारे साइतिछन्ति अष्टनिधि
अथच इतिहासर अस्तावल भर्ति
घोड़ामाने ताङ्क अपेक्षारे
सवार हेले सेमाने प्राणमूर्च्छा आरम्भिवे रक्तपात
येते हाणकाट। पुणिथरे
राजा ओ सम्राटङ्कर लागिजिब युद्ध हरिहाट।।

एमिति बेल आसिछि येतेबेले
तेत्रिश कोटि देवता चुप्चाप् रहिछन्ति
गुहारि अर्द्दलि आर्त्ति मणिषर
शुणिवा त दूरकथा
एवे बोधे आखिरे परल, किछि दुशे नाइँ
कान वि एते खराप किछि शुभे नाइँ।।

तथापि पितृपुरुष निर्द्देश
चरैवेति चरैवेति क्लान्तिहीन सूर्यङ्कर
यात्रा परि सुदूर आकाश।।

दिग्वलयाद् यथा ते आयान्ति
स्पष्टीभवन्ति, अस्पष्टीभवन्ति च मरुमरीचिकायाम्
कटितटे गोपिता अष्टनिधयः
अथचेतिहासस्याश्वशाला सन्निहिता
अश्वा अपि तेषां प्रतीक्षायाम्
आरोहणमात्रेण ते धाविष्यन्ति
रक्तपाताय हत्यार्थं च।
आरप्स्यते पुनरपि राज्ञां सम्राजां च घोरयुद्धम्।।

त्रयस्त्रिंशत्कोटिसङ्ख्याकास्त्रिदशाः शान्ताः
मानवस्यार्त्तियाच्ञानुरोधानां
श्रवणं तु दूरे
प्रायेणाद्य नेत्रेष्वावरणं, न किमपि दृश्यते
कर्णाश्च रुग्णाः, न किमपि श्रूयते।।

तथापि निर्देशः पितृपुरुषाणां
चरैवेति चरैवेति
क्लान्तिहीनयात्रेव सुदूराकाशे।।

किन्तु क'ण लक्ष्यहीन अभियात्रा
ये केउँ दिगरे
कलुष, पाप कल्मष क्लेश आड़े
कादुअ नर्द्दमा नर्क झासपाइँ
सकल नकारे?
भुलि सबु पिलादिन
सकल सरल स्वप्न निरीह मनकु
सह्याद्रि यात्रारे तले पड़ियाउथिवा
भाइमानङ्कु अथवा द्रौपदीङ्कु
तिले वि न चाहिँ
चरैवेति आगकु, आगकु?।।

सते अवा यात्राहिँ परिपूर्णर एकमात्र दिग
यात्राहिँ मुकति : प्रश्न आउ उत्तररु
चिन्तनरु कल्पनारु सन्देहरु
जीवनरु सपनरु, आर्त्ति आह्लादरु।
यात्रारे आमे वर्षिवु हलाहल
फु फु करि सर्पसम, मधुक्षरा नदनदी
आकाश वतास सभिङ्कु वि हलाहल करि
आमर दृढ़ विश्वास एवे केहि

किन्तु अभियात्रा लक्ष्यहीना किमु
कस्यां बत दिशि
कलुष-पाप-कल्मष-क्लेशानभित:
कर्दम-पूतिपरिवाह-नरकनिमज्जनाय
सर्वेष्वपि नकारेषु?
क्षणेनैव विस्मृत्य बाल्यस्य
सकलसरलस्वप्ननिरीहमानसान्
हिमालययात्रायां प्रपतत:
सहोदरानथवा द्रौपदीं
न किञ्चिद् विलोक्य
चरैवेति मन्त्रेणाग्रेऽग्रे?॥


प्रायेण यात्रा हि एकैव दिक् परिपूर्णताया:
यात्रा हि मुक्ति: प्रश्नादुत्तरात्
चिन्तनात्, कल्पनाया:, सन्देहात्
जीवनात्, स्वप्नात्, आर्त्तेराह्लादाच्च।
यात्रायां वयं वर्षिष्यामो हालाहलं
फूत्कारेण विषधारा इव मधु क्षरन्तीं नदीम्
आकाशं पवनं च सर्वं विषमयं कुर्वता-
मस्माकं विश्वासो दृढो यन्नहि कोऽपि

नीलकण्ठ आसिवेनि आमकु वञ्चेइवाकु
हलाहल आपे पान करि।।
हुएत चालिवु सेइ चरैवेति डाकरार
अर्थ भुलि मङ्गल कि बृहस्पति आड़े
पछकरि आखि साम्नार धरित्री
सातपर करि ता'र स्नेह ओ श्रद्धाकु।।

❖❖

आयास्यति नीलकण्ठोऽस्माञ्जीवयितुं
विषं स्वयमेव पीत्वा।।
प्रायेण चलिष्यामो वयं चरैवेत्यावाहनस्य
अर्थमविज्ञाय मङ्गलं बृहस्पतिं वाऽभित:
पृष्ठीकृत्य पुरतो वर्तमानां धरित्रीं
न्यक्कृत्य शतधा स्नेहं श्रद्धां च।।

❖❖



गुलाम-रसुल-सन्तोषः

तृतीयः सर्गः

तृतीय सर्ग

नूआ रासलीला

गोपीङ्कु घेनि वनमाली
यमुना बालिकुदे मिलि
शरद चन्द्र तेज झलि
निर्मल विराजइ बालि॥

– ओड़िआ भागवत, गोपलीला
त्रयोत्रिंश अध्याय

तृतीयः सर्गः

नूतना रासलीला

सह गोपीभिर्वनमाली
मिलितो यमुनापुलिने।
शारदचन्द्रज्योत्स्नादीप्ता।
निर्मला बालुका शोभिता॥

—जगन्नाथदासकृतोत्कलभागवते
गोपलीलायां त्रयस्त्रिंशाध्याये।

କୁହ ଜହ୍ନ ତୁମର ଏ ରଣିଫୁଲ ଆଲୁଅରେ

କ'ଣ ଖାଲି ଝଲସିବ ଖଣ୍ଡା କି ଭୁଜାଲି

ବୀଚ୍‌ବଜାର ରାସ୍ତାରେ ଜଣେ କିଏ ଧାଇଁଥିବ

ପ୍ରାଣ ବିକଳରେ ଓ ତା ପଛେ ଅସୁରଙ୍କ ପଲ

ଦି' ପାଖର ଘର ଓ ଦୋକାନଙ୍କର

କବାଟ ଝରକା ସବୁ ଧଡ୍‌ଧାଡ୍ ବନ୍ଦ ହୋଇଜିବ

ତା ବେକରେ ଖଣ୍ଡାଚୋଟ ରକ୍ତର ଫୁଆରା

ଛିନ୍ନମସ୍ତା ସୁପ୍ରାଚୀନ ଦେବୀଙ୍କ ସମାନ

ସିଏ ଦୁଶୁଥିବ, ତଥାପି କବନ୍ଧ ଧାଇଁଥିବ

ଜହ୍ନ-ଧୁଆ ଧୂଳିରେ ପଡ଼ିବା ଯାଏ

ଜେ ଜୁଆଡ଼େ ଲୁଚିଜିବେ କୋକୁଆ ଭୟରେ?।।

କୁହ ଜହ୍ନ କାହା ପ୍ରେମ ଅପେକ୍ଷାରେ

ଲତାକୁଞ୍ଜ ବିତାନରେ, ଯମୁନା କୂଳରେ

ଦରଭଙ୍ଗା ଚାଲଘର ବାରଣ୍ଡାରେ

ଅବା ରୁଗ୍‌ଣ ସହରର କୋଠା ଛାତ ଦାଢ଼େ

ତୁମକୁ ନିରେଖି ଆଉ ସାକ୍ଷୀ ରଖି

ଝିଅଟିର ପ୍ରାଣକଥା ପହଁରିବ ନାହିଁ ଆଉ

ଓଦା ଓଦା ନିଷ୍କଲଙ୍କ ପଦୁଅଁ ଆଖିରେ?।।

वद चन्द्र! तव ज्योत्स्नापुष्पालोके
किं विद्योतिष्यन्ते केवलं खड्गाः, छुरिकाश्च
विपणिमध्यमार्गे किमु कश्चिद् धावेत् प्राणभयेन
तत्पश्चाच्चासुराणां दलम्
उभयतो गृहाणामापणानां च
द्वारवातायनानि सहसैव निरोत्स्यन्ते
तस्य ग्रीवायां खड्गप्रहारेण शोणितनिर्झरिणी
सुप्राचीना च्छिन्नमस्ता देवीव स दृश्येत
तथापि धावेत् कबन्धो
ज्योत्स्नाधौतधूलौ पतनं यावत्
यत्र-तत्र सर्वे आत्मगोपनं करिष्यन्ति प्राणान्तकभयेन?।।

कथय चन्द्र! कस्यापि प्रेमप्रतीक्षायां
लताकुञ्जविताने, यमुनाकूले,
अर्धभग्नतृणगृहवरण्डके,
अथवा रुग्णनगरस्य भवनच्छत्रपार्श्वे
त्वां निरीक्ष्य प्रमाणीकृत्य च
बालिकायास्तस्या मर्मकथा न सन्तरिष्यति
आर्द्रीकृतनिष्कलङ्ककमलनयनयोः?।।
वद चन्द्र! त्वं किं वस्तुतः

कुह जह्न तुमे क'ण सत सत
निर्जीव पथर
तेवे ए कविता सबु गदागदा चित्र
काहा पाइँ क'ण पाइँ?
सबु आजि मृत्यु पटुआर?।।

कुह जह्न तुमे ठिक् उइँला बेलकु
पूर्वाशारे से टोका गाआँरु आसि
पहुञ्चिला कानिरे कोलि दिओटि बान्धिरखि
केवेवि न देखिथिवा बापार साक्षात् पाइँ
ता आखिरे तुमे क'ण प्रतिफलि हसिवनि
बापार कअँल कथा पदे शुणि
तुम शुभ्र आलुअरे आउ केवे
झलसि उठिव नाहिँ ता आखिर तारा?
हेउपछे सकालकु से न थिव
मन्दिरर मुण्डि मारि समुद्ररे झास देइथिव।।

निर्जीव: प्रस्तर:
तर्हि कविता एता: सर्वाश्चित्रसमवाय:
कस्य कृते? किमर्थम्?
इयमद्य मृत्युशोभायात्रा?

कथय चन्द्र! तवैवोदयकाले
पूर्वाशायां, स बालको धर्मपदो* ग्रामात् समागत:
निजांशुके कानिचन वदरीफलानि बध्वा
अदृष्टपूर्वस्य पितु: दर्शनार्थ
तस्य दृशि प्रतिफलितस्त्वं न किं हसिष्यसि
पितु: कोमलवाक्यानि निशम्य
तव शुभ्रालोकेन कदापि किं
न विद्योतिष्यते तन्नयनतारका?
अस्तु नाम, प्रात:काले स न भवतु
किन्तु मन्दिराग्रं विनिर्माय रात्रावेव सागरे अत्मानं व्यस्रक्ष्यत्।।
भण चन्द्र! तस्मात् कारणात् किं

---

* कोणार्कमन्दिरनिर्माणे प्रमुखशिल्पकारस्य 'विशु महारणा' इत्याख्यस्य एक एव पुत्रो य: कोणार्कमन्दिरशिखाग्रं रात्रावेव विनिर्माय द्वादशशतशिल्पकाराणां प्राणरक्षार्थम् सूर्योदयात् पूर्व मन्दिराग्रात् समुद्रे कूर्दन् स्वप्राणान् तत्याजेति उत्कलकिंवदन्तीषु प्रसिद्धि:।

कुह जह्न सेइथिपाइँ कि रोषभरे
अमानिआ समुद्र पवन
पथरकु ओदा करि तम जोछनारे
रेकेटि लागिछि खालि वर्ष वर्ष धरि
से पापर सते अवा प्रायश्चित्त पाइँ
कथा कहुथिवा मूर्ति, सङ्गीत ओ नृत्यर आसर
पुणि थरे मूक ओ वधिर होइ
फेरिवाकु पथर छातिकु?।।


कुह जह्न कुआड़े हजिला
रासलीला कदम्ब ओ वंशीस्वन
अर्द्धमृत, श्वासरुद्ध यमुना पुलिने
हजिगला कुआँर पुनेइँ गीत
पालभूत, ठाकुर विमान
फुल बउलवेणीर स्वर उच्चाटन
एवे त दुशुछि तुम किरणरे
मन्दिर बेढ़ारे देशीमद पिउथिवा पञ्झाए युवक
ताङ्क सङ्गे लुङ्गिपिन्धा लज्जाहीन मन्दिर पूजक।।

❖❖

चञ्चलः समुद्रपवनः सरोषं
तव ज्योत्स्नया पाषाणमार्द्रीकृत्य
वर्षाणि चर्वति
किं तस्य पापस्य प्रायश्चित्ताय
जीवन्मूर्त्तीनां सङ्गीतनृत्योत्सवानां च
पुनरपि मूकीभूय वधिरीभूय च
प्रतिगमनाय पाषाणवक्षसि?।।

वद चन्द्र! क्व गतास्ते
रासलीला-कदम्ब-वंशीस्वनाः
अर्धमृत-श्वासरुद्धयमुनापुलिने!
क्व गताश्च पलालभूत-देवविमान-
कुमारपूर्णिमालोकगीतसम्मोहकस्वराः!
अद्य किन्तु दृश्यन्ते तवैव किरणे
मन्दिरप्राङ्गणे पिबन्तो युवानो देशजमदिरां
हत्याधर्षणादियोजनाभिलिप्ताः
तैश्च सह धृतप्रावृतो लज्जाहीनो मन्दिरपूजकः।।

❖❖



के. के. हेब्बारः

चतुर्थः सर्गः

चतुर्थ सर्ग

देवी पूजा

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।।
या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।।


–देवी माहात्म्य
पञ्चम अध्याय

चतुर्थः सर्गः

देवीपूजा

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

—देवीमहात्म्यम्
पञ्चमाध्यायः



के. रेड्डेप्पा नायडू

॥ १ ॥

से किछि जाणि न थिला।
बापा ताकु निदरु उठाइ काखेइले
चुमा देइ, कबाट फिटेइ
घरु बाहारिले।।

कुआँतारा जलुथिला आकाशरे
विलम्बित प्रहरर, शेष वसन्तर
कोइलिटि गीत गाउथिला।
दशखोज गला परे छाइपरि
आउ दुइजण आसि बापाङ्कु मिशिले।

बापा पुणि गेह्लाकले चुमा देले
मुण्ड ता'र आउँशिले
निदुआ आखिरे बापाङ्क मुहँ बि
झाप्सा झाप्सा दुशुथिला
चुमा खाइ निद आसिगला।।

गाआँमुण्ड दरभङ्गा कुनिमन्दिररे
सभिएँ मिलिले

॥ १ ॥

न किमपि ज्ञातं तेन
तं पिता निद्रात उत्थाप्य
अङ्कयन् चुम्बन् कपाटमुद्घाट्य
गृहान्निस्सृतः।।

उषस्येवाकाशे कोमलतारका प्रदीप्यते स्म
विलम्बितप्रहरस्य, अन्त्यवसन्तस्य
पुंस्कोकिलो गायति स्म।
दशपदगमनात् परं छाये इव
द्वावपरौ पितरममिलताम्।।

पिता पुनर्हस्तेनादृत्य चुम्बित्वा च
मस्तकं तस्यामर्षत्।
निद्रालुनयनाभ्यां पितुर्मुखमपि
अस्पष्टमदृश्यत
चुम्बनेन पुनर्निद्राऽऽगता।।

ग्रामप्रान्तेऽर्धभग्ने लघुमन्दिरे
सर्वे मिलिताः

बापा ताकु देवीङ्क पाखरे
निदरु उठेइले ओ तले मुण्ड छुइँ
जुहार करिवा पाइँ निर्द्देशिले।।
से जुहार हेला
सेतिकि से छअमास हेला
साइपड़िशा सभिङ्कु नम करि
शिखि जाइथिला।।

हठात् दुइ असुर
जाबुड़ि धरिले ता'र हातगोड़
छाटिपिटि छटपट कुनि छेलिछुआपरि
मुण्ड ओ गण्डि अलगा मुहूर्तके
विकटाल चित्कार ओ ता'परे
भयङ्कर नीरव सकाल।।

देवीङ्कर देहसारा
असुरङ्क आखि मुहँ देहसारा
रक्त छिटा निगिड़िला
निमिषके सबु सरिगला
आम्बतोटा गहलरे

पिता तं देव्याः पुरतः
निद्रातो जागरितवान्, मस्तकेन भूमिं संस्पृश्य
प्रणमितुं निरदिशत्।।
स प्राणमत्
एतत् स षण्मासेषु
प्रतिवेशिनो वृद्धान् ज्येष्ठाँश्च नामं नामं
विज्ञातवान् पूर्णतः।।

हठात् पित्रा सहागतौ द्वावसुरौ
बलादाश्लिष्यताम् तस्य हस्तपादान्
प्रकम्पमानोऽस्थिरोऽजाशिशुरिव सः
क्षणेन पृथग्भूतं मस्तकं शरीदाद्
भीषणचीत्कारेण
ततः परं भयङ्करः शान्तः प्रातःकालः।।

देवीशरीरात्,
राक्षसयोर्मुखनयनेभ्यो
निःसृता रक्तबिन्दवः
सर्वमेवावसितं क्षणेन
सहकारकुञ्जघनतायां

कोइलिर शेष फगुण गीतरे
कअँल वसन्त ऋतु मरि शोइगला।।

।।२।।

हे रत्रिरूपिणी देवी, हे भ्रान्तिरूपिणी
हे क्षुधारूपिणी देवी, हे निद्रारूपिणी
हे तृषारूपिणी मातः
आर्त्तङ्क दुःखनाशिनी हे कन्तिरूपिणी
एड़े एड़े ढिमा आखिरे त तुमे चाहिँथिल
हात उठेइवा टिके दूरकथा
शब्दटिए उच्चारिल नाहिँ
वज्र विद्युत् नादरे थरिलानि भुवन मेदिनी
तुमे क'ण इच्छा करि सेइ कुनि मन्दिररु
अचानक अन्तर्द्धान हेल
वा थिले बि एसबु छोटकथारे
किछि याएआसे नाहिँ, तुमे देवी सदा निर्विकार
बुझिबाकु विशाल दायित्व तुम जगद्धात्री
जननी गो चराचर निखिल विश्वर।।

कोकिलस्यान्तिमफाल्गुनगीतेन
मृतः सुप्तः कोमलो वसन्तः।।

।।२।।

हे रात्रिरूपिणि! हे भ्रान्तिरूपिणि देवि!
हे क्षुधारूपिणि! हे निद्रारूपिणि देवि!
